

International Journal of Multidisciplinary Research and Development


Volume: 2, Issue: 7, 159-160
July 2015
www.allsubjectjournal.com
e-ISSN: 2349-4182
p-ISSN: 2349-5979
Impact Factor: 3.762

**विश्वजित् राज**
शोधरतः (वर्द्धमान विश्वविद्यालयः)
सहशिक्षकः (गयेश्वरी पि बि विद्यानिकेतनः) पः बः

**Correspondence:**
**विश्वजित् राज**
शोधरतः (वर्द्धमान विश्वविद्यालयः)
सहशिक्षकः (गयेश्वरी पि बि विद्यानिकेतनः) पः बः

# दर्शनम् विज्ञानम् च

## विश्वजित् राज

ज्ञानमातुः सन्तानद्वयमस्ति – दर्शनं[1] विज्ञानञ्च[2]। विज्ञानकार्यं सम्पद्यते पञ्चज्ञानेन्द्रियैर्बुद्ध्या च। दर्शनकार्यसम्पादने अपि ज्ञानेन्द्रियाणां बुद्धेश्च समधिकं प्राधान्यं विराजन्ते, परन्तु अत्र मनस्तेषां सेनापतिः। यदि दर्शनं ज्ञानबृक्षस्य पुष्पं चेत्, तर्हि विज्ञानं भवति तस्य फलम्। ज्ञानबृक्षस्तस्य फलेन च पुष्पेण च परिदृश्यमानव्यवहारिकजगतमेतत् उत्पादयति धारयति च। ज्ञानमाता तस्या दर्शनं विज्ञानञ्चेति सन्तानद्वयेन सत्यस्वरूपन्मोचनं व्यवहारिकजीवनस्योन्नतिविधानञ्च कृत्वा मानवसभ्यतायाः परमकल्याणं साधयितुमिच्छति। अधुना ज्ञातव्यमेतत्, किं नाम दर्शनं किं वा विज्ञानम्। भारतीयैतिह्यानुसारेण दर्शनमिति शब्दस्य लक्षितार्थस्तत्त्वज्ञानमिति। ষफिलोसफि[3] इति शब्दस्यार्थो ज्ञानं प्रत्यनुरागः। विज्ञानमिति शब्देन विशेषज्ञानमेव ब्युत्पाद्यते। तत्त्वज्ञानं विशेषज्ञानञ्च प्रायः समार्थस्य द्योतकमेव। यतो हि पदार्थस्य तत्त्वज्ञानमेव तस्य विशेषज्ञानस्य जनकः, ततो दर्शनं विज्ञानञ्च पदद्वयमेव प्रायः समार्थस्य द्योतकम्। उभयोः स्वरूपनिरूपणकल्पे मानवेन्द्रनाथ राय[4] इति महोदयस्योक्तिरत्र स्मरणीया – कथमियं सृष्टिः? केन प्रकारेण वा इयं सृष्टिः? प्रश्नद्वयस्योत्तरप्रदानप्रचेष्टावशादेव मनुष्यमनसि विमूर्त्ताध्यात्मिकचिन्ता विकशिता जाता। एतदेव कथ्यते, केन प्रकारेण इयं सृष्टिः – अस्य प्रश्नस्योत्तरप्रदानं विज्ञानस्य कार्यम्। कथमियं सृष्टिः – अस्य प्रश्नस्योत्तरप्रदानं दर्शनस्य कार्यम्[5]।
तदेव साधारणं ज्ञानं यदस्माकं पञ्चज्ञानेन्द्रियैः लब्धाभिज्ञतायां प्रतिदिनं सञ्चितं भवति। एतादृशानां साधारणज्ञानानां परिमार्जनेन परिवर्द्धनेन च लब्धं सुसंहतं विशेषज्ञानमेव वैज्ञानिकज्ञानम्। यदैतत् विशेषज्ञानं विशेषप्रकारेण विश्लेषितं भूत्वा जीवनजिज्ञासायां जगज्जिज्ञासायाञ्च सामग्रिकरूपेणालोचितं भूत्वा सुनिश्चितज्ञानं प्रयच्छते, तत् ज्ञानमेव दार्शनिकज्ञानम्। एतद्विषये हार्वाट् स्पेनसार् इति विश्वविश्रुतदार्शनिकमहोदयस्य कथनम् – **"Science is partially unified knowledge and philosophy is completely unified knowledge."[6]** अतएव वक्तव्यमत्र, यथा वैज्ञानिकज्ञानं साधरणज्ञानमूलकं, तथैव दार्शनिकज्ञानमेव वैज्ञानिकज्ञानमूलकम्। अतएव दर्शनं विज्ञानञ्च परपरस्याणरस्वरूपम्। पल्सेन् इति महोदयस्य कथनम् – **"Philosophy is the sum-total of all scientific knowledge."[7]** अतो ज्ञानमातुः सभ्यताधारकवाहकसदृशयोः सन्तानद्वयोर्मध्ये कीदृशः सम्वन्धो विद्यते – एष निरूपणमेवास्य शोधनिबन्धस्य प्रतिपाद्यविषयः।
दर्शनविज्ञानयोर्मध्ये सम्वन्धो निरूपणकार्यस्य प्रागेव स्मरणीया प्रतीच्यदार्शनिकस्य वेवार् इति महोदयस्य सा उक्तिः – **"Science without philosophy is an aggregate without unity, a body without soul; philosophy without science is a soul without a body."[8]** यथा शरीरश्चात्मा च सम्पूर्णरूपेण पृथग्सत्ता भूत्वापि परपरस्य साहचर्यं समन्वयञ्च विना नास्ति तयोः पृथगस्तित्वं, तथैव विज्ञानदर्शनयोः सम्वन्धः। सांख्यदर्शनोक्त–पङ्ग्वन्धगमनवत [9] तयोः सम्वन्धः। दर्शनविज्ञानयोर्मध्ये सम्वन्धनिरूपणकार्ये अवतीर्णो भूत्वैतल्लक्ष्यते, उभयोः उद्देश्यं लक्ष्यं वा एकमभिन्नञ्च; परन्तु लक्ष्यसिद्धिप्रणाल्या लक्ष्यक्षेत्रस्य च पार्थक्यवशादुभयोर्मध्ये कतिपयसनि वैसादृश्यान्यपि स्पष्टरूपेण प्रतीयन्ते।

(क) सादृश्यानि :–

1. **उत्पत्तिगतसादृश्यम् :–** जिज्ञासाया बुद्धितीक्ष्णतायाश्च सम्मिलनमेव दर्शनविज्ञानयोरुत्पत्तिकारणम्। अज्ञातज्ञानलाभेन जिज्ञासानिवारणमेव तयोः प्राणशक्तिनिदानम्। मनुष्याणां पञ्चज्ञानेन्द्रियैः लब्धाभिज्ञतानां स्वाभाविकव्याख्याप्रवृत्तेरेव दर्शनविज्ञानयोर्जन्म। आदिममनुष्याः यदा इमां प्रकृतिमातरं द्रष्टुं बोद्धुं ज्ञातुञ्च शिक्षितवन्तः; तस्याः क्रोधादात्मानं त्रातुं शिक्षितवन्तः; तदैव दर्शनविज्ञानयोः उत्पत्तिरभवत्। मनुष्याणां चिन्तशीलमस्तिष्कस्यानुसन्धित्साया अनिवार्यप्रकाशस्वरूपं ज्ञानमातुः सन्तानद्वयमेतद्।

2. **उद्देश्यगतसादृश्यम् :–** दर्शनविज्ञानयोः उद्देश्यमेकमेवाद्वितीयम्। उभयोरेव मुख्योद्देश्यं सत्यानुसन्धानेन जगतो जीवनस्य च रहस्योद्घाटनम्। अतो जगतो जीवनस्य च व्याख्यातारूपेण दर्शनं विज्ञानञ्च सममार्गस्य पथिकद्वयम्। सत्योपलब्धिना सत्योद्घाटनेन च जागतिकसौन्दर्यविधानमेव तयोः

प्रधानलक्ष्यम्। एतद्विषये प्याट्रिक् इति महोदयस्योक्तिः उल्लेखनीया – **"They have the same spirit and the same purpose – the honest and labourous search for truth."**[10]

**(ख) वैयादृश्यानि :–**

1. दर्शनविज्ञानयोर्मध्ये जिज्ञासाक्षेत्रगत–वैसादृश्यमस्ति। विज्ञानस्य जिज्ञासाक्षेत्रमांशिकं खण्डितञ्च। पक्षान्तरे दर्शनस्य जिज्ञासाक्षेत्रं सामग्रिकमखण्डितञ्च। प्रकृतिजगत एको विभाग एव विज्ञानस्यालोच्यक्षेत्रम्। पदार्थविद्यायां केवलमेव पदार्थतत्त्वं, प्राणीविद्यायां केवलमेव प्राणीतत्त्वं, मनोविद्यायां केवलमेव मनस्तत्त्वं वालोच्यते। प्रकृत्याः खण्डितांश एव विज्ञानीनां लक्ष्यम्। पक्षान्तरे दर्शनस्यालोच्यविषय एकाधारे विश्वब्रह्माण्ड एव। दर्शनस्य मूललक्ष्यं विश्वस्य सामग्रिकज्ञानार्जनम्। दार्शनिकाः सामग्रिकदृष्ट्या जगतो जीवनस्य च स्वरूपलब्धिकरणेन तयोर्जागतिकमूल्यं निरूपयन्ति।
2. वस्तुन इन्द्रियग्राह्यवाह्यसत्ता एव विज्ञाने आलोच्यते। परन्तु दर्शनस्यालोच्यविषयो वस्तुन इन्द्रियग्राह्यवाह्यसत्ता अन्तर्निहिततत्त्वञ्च। यतो हि विज्ञानं केवलमेव वस्तुन इन्द्रियग्राह्यसत्ताविषयकव्याख्यां प्रयच्छति, ततः केवलमेव वस्तुन उपादानकारणस्य ज्ञानलाभेनैव हि तृप्यते विज्ञानम्। किन्तु पदार्थानां तत्त्वज्ञानेन तेषामुपादानकारणस्य निमित्तकारणस्यादिकारणस्य च ज्ञानलाभेनैव हि तृप्यते दर्शनम्।[11]
3. विज्ञाने केवलमेव वस्तुस्वरूपमालोच्यते; वस्तूनां जागतिकस्थाननिर्णये मूल्यनिर्धारणे च नास्ति जिज्ञासा। किन्तु वस्तुनः स्वरूपज्ञानेन सह तेषां जागतिकमूल्यनिर्धारणमपि दार्शनिकानामालोचनाक्षेत्रम्। न केवलं जागतिकमूल्यमपि तु परममूल्यनिरूपणमपि दर्शनचिन्तनस्योउद्देश्यम्। श्यामलकृष्ण वन्दोपाध्याय इति महोदयः उक्तवान् – एको विज्ञानी केवलमेव सत्यसाधकः; परन्तु एको दार्शनिक एकाधारे सत्यसाधकः, शिवसेवकः ;नीतिसेवको वाद्ध सुन्दरपूजकश्च।[12]
4. विज्ञाने पूर्वनिर्धारितरूपेण विचाररहितरूपेण च कार्यकारणनीति–प्राण–मन–देश–कालादीनि कतिपयानि तत्त्वानि स्वीक्रियन्ते। एतेषामीमांसिततत्त्वानामाधारे एव वैज्ञानिकानुसन्धानं विकशितं भवति। परन्तु दर्शने केषामपि तत्त्वानां यथार्थता पूर्वनिर्धारितरूपेण न स्वीक्रियते। विज्ञाने यानि विचाररहितानि तत्त्वानि स्वीक्रियन्ते, तेषां तत्त्वानामेव यथार्थतास्तित्वं वा दर्शने आलोच्यते। एतद्विषये कम्टे इति प्रतीच्यदार्शनिकस्य कथनम् – **"Philosophy is the science of science."**[13]
5. सत्यानुसन्धानमेव विज्ञानम्। पक्षान्तरे अद्वितीयसत्यस्य व्याख्या एव दर्शनम्। यतो हि विज्ञानस्यानुसन्धानलब्धं सत्यमभिज्ञतया विचार्य्यं; तत एकस्य विशेषकालस्य सर्वे विज्ञानिन आपातप्रमाणप्रतिपादितं वैज्ञानिकतत्त्वं सत्यरूपेण गृहीत्वा तस्य तत्त्वस्य समरूपव्याख्यां प्रयच्छन्ति। किन्तु कालान्तरे तत्तत्त्वमयथार्थत्वरूपेणापि प्रमाणितं भवितुमर्हत्; उदाहरणम् – जन् डाल्टन् इति पदार्थविज्ञानिना प्रतिष्ठितः परमाणुवादः। परन्तु विविध दर्शनप्रस्थानानि अद्वितीयसत्यस्यैव विविधव्याख्या प्रयच्छन्ति। अतो दार्शनिकतत्त्वं न कदापि सर्वजनस्वीकृतं भवति, नापि सम्पूर्णभ्रान्ततत्त्वरूपेण परिगण्यते।
6. ज्ञानस्य प्रयोगमूलकशाखा विज्ञानम्; पक्षान्तरे ज्ञानस्यानुभवमूलकशाखा दर्शनम्। एको विज्ञानी कदापि सत्योपलब्धिं कृत्वा तृप्तो न भवति, स सर्वदा तं सत्यमस्माकं प्रात्यहिकजीवनस्य वहुक्षेत्रेषु वहुविधरूपेणानुप्रवेशनाय यतते। परन्तु दार्शनिकाः सत्यस्य प्रयोगादपेक्षा उपलब्धिकरणे एवाधिकं यतते। ततो वहुक्षेत्रेषु दार्शनिकतत्त्वान्यनुभवमूलकपर्याये एव वर्तन्ते, तेषां नास्ति प्रयोगमूलकग्रहणयोग्यता।
7. वैज्ञानिकज्ञाने मनसः अपेक्षा इन्द्रियाणां बुद्धेश्च प्राधान्यमधिकं वर्तन्ते। इन्द्रियलब्धवत्ता बुद्धिग्राह्यता चैव वैज्ञानिकतत्त्वस्य सारस्वरूपः। ततो वैज्ञानिकज्ञाने प्रत्यक्षप्रमाणस्य गुरुत्वं सर्वाधिकम्। मनसः अनुभववेद्यता एव दार्शनिकयुक्तेस्तत्त्वस्य वा सारस्वरूपः। ततो हि दार्शनिकयुक्तिषु प्रत्यक्षवदनुमानप्रमाणमपि समधिकं गुरुत्वपूर्णम्।
8. विज्ञानिनः सम्यकरूपेण वस्तुवादस्य समर्थकाः। पार्थिववस्तुनः स्वरूपोद्घाटनेन जागतिकोन्नतिविधानमेव विज्ञानीनां प्रधानलक्ष्यम्। वैज्ञानिकज्ञाने भाववादस्य नास्ति किमपिमूल्यम्। पक्षान्तरे दर्शनं विज्ञानस्य विपरीतपथस्य पथिकः। कतिपयान् वस्तुवादिदार्शनिकान् विना सर्वे दार्शनिकाः संकीर्णतर वस्तुजगतो जागतिकवस्तुभोगस्य च लिप्सां परित्यज्याध्यात्मचिन्तया चिन्तिता भूत्वा भवार्णवे प्लवन्ते।

परन्तु वहुविधपार्थक्यविद्यमाने सत्यपि उभयोर्मध्ये बृक्षस्य फलपुष्पवत् सम्वन्धः अस्ति। दर्शनं विज्ञानञ्च परपरस्याधारस्वरूपम्। यदा दर्शनेन दृश्यमानजगत्विषयकाधुनिरतमाभ्रान्ततथ्येन प्रयोजनमनुभूयते, तदा विज्ञानमेव तत्तथ्यं प्रयच्छति। वस्तुतो विज्ञानस्य दृढाधारे एव दर्शनस्यावस्थितिः। पक्षान्तरे विज्ञानस्यावस्थितिरपि दर्शनस्य दृढाधारे एव वर्तते। यतो हि विज्ञाने गृहीतानाममीमांसीतानां मन–देश–प्राण–कालादीनां तत्त्वानां यथार्थता विद्यमानता स्वरूपञ्च दर्शने एवालोच्यन्ते। वहुक्षेत्रेषु विज्ञानप्रतिपादितसिद्धान्तेषु असामञ्जस्यं विरोधः वा दृश्यते। तदा दर्शनमेव विविधविज्ञानप्रस्थानानां प्रमाणप्रतिपादितानन्तिमसिद्धान्तान् एकीभूतं सुसंवद्धञ्च कृत्वा तेषु समन्वयं सामञ्जस्यञ्च साधयति।

अतएवालोचनान्ते एतद्वक्तुं शक्यते दर्शनं विज्ञानञ्च तत्त्वज्ञानलाभस्य स्वतन्त्रमाध्यमद्वयं भूत्वापि परपरस्य परिपूरकम्। ओयेवार् इति प्रतीच्यदार्शनिकस्य मतमनुसृत्वा अतिसंक्षेपेणोच्यते – दर्शनं विना विज्ञानमात्माहीनशरीरं , विज्ञानं विना दर्शनं शरीरहीनात्मा च।

**सहायकग्रन्थमूलकानि तथ्यसूत्राणि पदटीकाः च**


1. 'दृशिः प्रेक्षणे' इति प्रेक्षणार्थवाचकेन दृश् इति धातुना सह करणवाच्ये ल्युट् इति प्रत्यययोगेन निष्पादितस्य दर्शनमिति पदस्यार्थः प्रेक्षणम्। प्रेक्षणेन यथार्थज्ञानलाभः तत्त्वसाक्षात्कारं वा दर्शनमिति शब्दस्य लक्षितार्थः।
2. वि–ज्ञाकरणवाच्ये ल्युट् त्र विज्ञानम्। अतो चिशेषज्ञानलाभिस्य करणमेव विज्ञानम्। विशेषज्ञानशब्देन जगद्विषयकसूक्ष्मज्ञानं यथार्थज्ञानं वा वोध्यते।
3. **'Philos' 'Sophia'** चेति ग्रीकपदद्वयस्य सम्मिलनरूपमेव **'Philosophy'** इति। **'Philos'** इति पदस्यार्थः अनुरागः ; **'Sophia'** इति पदस्यार्थः ज्ञानम्। अतः ज्ञानं प्रत्यनुरागो हि **'Philosophy'** इति।
4. भारतवर्षे 'मार्कसवादी कम्युनिस्ट् पार्टी' इति सङ्घस्य प्रतिष्ठाता।
5. राय, मानवेन्द्रनाथ : '*विज्ञान ओ दर्शन*' (बङ्गानुवादः – स्वदेशरञ्जन दास), रेणेसास पावलिसार्स, कलकाता, पृ. 31 (2008)
6. पाल, कालीपद : '*दर्शन ओ युक्तिविज्ञान परिचय*', ओरियेण्टाल वुक कोम्पानी प्रा. लि., कलकाता, *loc. Cit.* पृ. 14 (2001)
7. सामन्त, विमलेन्दु : '*दर्शन परिचय*', छाया प्रकाशनी, कलकाता, *loc. Cit.* पृ. 13 (2014)
8. वन्दोपाध्याय, श्यामलकृष्ण : '*दर्शन प्रवेशिका*', क्याल्काटा बुक हाउस, कलकाता, *loc. Cit.* पृ. 11 (2001)
9. "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वान्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।" (सांख्यकारिका, श्लोकः– 21)
10. वन्दोपाध्याय, श्यामलकृष्ण : '*दर्शन प्रवेशिका*', क्याल्काटा बुक हाउस, कलकाता, *loc. Cit.* पृ. 8 (2001)
11. वन्दोपाध्याय, श्यामलकृष्ण : '*दर्शन प्रवेशिका*', क्याल्काटा बुक हाउस, कलकाता, *loc. Cit.* पृ. 8 (2001)
12. *I bid.* पृ. 8
13. सामन्त, विमलेन्दु : '*दर्शन परिचय*', छाया प्रकाशनी, कलकाता, *loc. Cit.* पृ. 13 (2014)